ॐ

# दक्षिणामूर्ति स्तोत्रम्

१. विश्वं दर्पणदृश्यमान-नगरीतुल्यं निजान्तर्गतम्
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

२. बीजस्यान्तरिवांकुरो जगदिदं प्राङ् निर्विकल्पं पुनः
मायाकल्पितदेश-काल-कलना वैचित्र्यचित्रीकृतम्।
मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

३. यस्यैव स्फुरणं सदात्मकमसत् कल्पार्थकं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान्।
यत्साक्षात्करणाद्-भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

४. नानाच्छिद्र-घटोदरस्थित महादीप-प्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरण-द्वारा बहिःस्पन्दते।
जानामीति तमेव भान्तमनुभाति-एतत्समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

५. देहं प्राणमपीन्द्रियाण्यपि-चलां बुद्धिं च शून्यं विदुः
स्त्री-बालान्धजडोपमास्त्वहमिति भ्रान्ता भृशंवादिनः।
मायाशक्ति-विलास-कल्पित-महा-व्यामोह-संहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।

६. राहुग्रस्त-दिवाकरेन्दु सदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान्।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥

७. बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यन्तः स्फुरन्तं सदा।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥

८. विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मनाभेदतः।
स्वप्ने जाग्रति वा य एष पुरुषो माया-परिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥

९. भूरंभांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम्।
नान्यत्किंचन विद्यते विमृशतां यस्मात्परस्माद्विभोः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥

१०. सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात्तदर्थमननात् ध्यानाच्च संकीर्तनात्।
सर्वात्मत्व-महाविभूति-सहितं स्यादीश्वरत्वं स्वतः
सिद्ध्येत्तत्पुनरष्टधापरिणातं चैश्वर्यमव्याहतम्॥